ECONSPEAK: A Journal of Advances in Management IT & Social Sciences,
Vol. 10, Issue 8, August 2020 Impact Factor 6.569 ISSN: (2231-4571)
www.skirec.org Email Id: skirec.org@gmail.com

# रससूत्रव्याख्यानविमर्शः

**डा. पि.के . दीपक् राज्**

**सहायकाचार्यः,कालिकट् आदर्शसंस्कृतविद्यापीठम्**

**सारांशः**

भारतीयकाव्यतत्त्वचिन्तायां रससम्प्रदायस्य स्थानं सुमहत् वर्तते। नाट्यशास्त्रकारेण भरतमुनिना प्रथमं तावत् रसस्वरूपमधिकृत्य निरूपणं कृतम्। भरतमुनिना नाट्यरस एव निरूपितः। तथापि साहित्यशास्त्राचार्यैरपि तदेव रससूत्रं स्वीकृत्य काव्ये रसवत्वविचारः कृतः। केनाप्याचार्येण भरतोक्तरससम्प्रदायादुपरि रससम्प्रदायमधिकृत्य अद्य पर्यन्तं किमपि नोक्तम्। भरतमुनिकृतस्य रससूत्रस्य व्याख्यानमेव पश्चात्काले साहित्यशास्त्राचार्यैः बहुधा कृतम्। तत्र रससूत्रव्याख्यातृषु प्रमुखाः भवन्ति भट्टलोल्लटः , श्रीशङ्कुकः, भट्टनायकः, अभिनवगुप्तश्च। तेषामाचार्याणां रससूत्रव्याख्यानानां विमर्शः मम्मटकृतकाव्यप्रकाशदिशा अत्र क्रियते।

**कुञ्चीशब्दाः**

रससम्प्रदायः, रसनिष्पत्तिः, विभावः, अनुभावः, व्यभिचारीभावः, संयोगः, रसानुमितिः।

**आमुखम्**

भरतमुनिकृतरससूत्रस्य व्याख्यातृषु प्रमुखाः भवन्ति भट्टलोल्लटः , श्रीशङ्कुकः, भट्टनायकः, अभिनवगुप्तश्च। एषां रससूत्रव्याख्यानं स्वसिद्धान्तानुसारमुपलभ्यते। तत्र भरतमुनेः रससूत्रं यथा -

“विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः” (नाट्यशास्त्रम् इति।

विभावश्च, अनुभावश्च, व्यभिचारिणश्च विभावानुभावव्यभिचारिणः। तेषां संयोगः विभावानुभावव्यभिचारिसंयोगः। तस्मात् विभावानुभावव्यभिचारिसंयोगात् रसस्य निष्पत्तिः रसनिष्पत्तिः। विभावानाम्, अनुभावानां, व्यभिचारिभावानां च संयोगात् रसनिष्पत्तिः भवति इत्यर्थः इति सूत्रार्थः। अत्र विभावानुभावव्यभिचारिभावानां व्याख्याने एतेषामाचार्याणां मदभोदो न दृश्यते।

किन्तु संयोगशब्दस्य निष्पत्तिशब्दस्य रसशब्दस्य च व्याख्याने तेषां मतानि स्वसम्प्रदायानुसारं वर्तन्ते।

विशेषेण भावनायां विषयीक्रियन्ते इति विभावः। अनु पश्चात् अथवा अनुकूलतया भावयन्ति इति अनुभावाः। विशेषेण आभिमुख्यं चरन्ति इति व्यभिचारिणः।

**रससूत्रव्याख्यानानि**

भरतकृतरससूत्रस्य प्रधानतया चत्वारि व्याख्यानानि सन्ति। तानि च भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादश्च। एषु आद्यानां त्रयाणामाचार्याणां व्याख्यानग्रन्थाः अद्य नोपलभ्यन्ते। तेषां मतानि अभिनवगुप्ताचार्येण स्वविरचितायां नाट्यशास्त्रव्याख्यायामभिनवभारत्यां ध्वन्योलोकव्याख्यायां लोचने च स्वस्य अभिव्यक्तिवादेन सह क्रोडीकृतानि दृश्यन्ते। अभिनवगुप्तस्य परामर्शादेव लोल्लटशङ्कुकभट्टनायकानां रससूत्रवव्याख्यानमधिकृत्य अद्य ज्ञायते।

काव्यप्रकाशस्य चतुर्थोल्लासे मम्मटाचार्यः रसस्वरूपमेवं प्रत्यपादयत्।यथा -

कारणान्यथ कार्याणि सहकारीणि यानि च।

रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।

विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।। इति। (काव्यप्रकाशः 4-27,28)

तदनु तत्र भरतमुनिकृतरससूत्रस्योल्लेखपूर्वकं लोल्लटादीनां चतुर्णामाचार्याणां रससूत्रव्याख्यानानि न्यरूपयत्। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रससूत्रं चतुर्भिराचार्यैः चतुर्धा व्याख्यायते। विभावैः ललनादिभिः आलम्बनकारणैरुद्यानैः उद्दीपरकारणैश्च अनुभावैः कटाक्षभुजाक्षेपादिभिः तथा व्यभिचारिभावैः निर्वेदादिभिः च संयोगात् रसनिष्पत्तिर्भवति इति सूत्रार्थः। रसव्याख्यातारः सर्वे आचार्याः मतभेदं विना एतदङ्गीकुर्वन्ति।

**लोल्लटमतम्**

रससूत्रव्याख्यातृषु प्रथमस्य लोल्लटस्य मतानुसारेण विभावैः ललनादिभिः आलम्बरकारणैः उद्यानादिभिः उद्दीपनकारणैः जनितः, अनुभावैः कटाक्षभुजाक्षेपादिभिः ज्ञापितः, व्यभिचारिभावैः पुष्टः च स्थायी रसरूपतामापन्नः मुख्यया वृत्या अनुकार्ये रामादौ उत्पद्यते। एवमनुकार्ये उत्पन्नः रसः तद्रूपतानुसन्धानबलात् नायकानुकर्तरि नटे अपि अमुख्यया वृत्या प्रतीयते।

अत्र भरतसूत्रस्थस्य संयोगपदस्य सम्बन्धत्रयम् अर्थः। जन्यजनकभावः, ज्ञाप्यज्ञापकभावः, पोष्यपोषकभावश्चेति। तथा च विभावादीनां स्थायिना सह जन्यजनकभावसम्बन्धः। विभावादयो जनकाः स्थायी जन्य इत्यर्थः। अनुभावानां स्थायिना सह ज्ञाप्यज्ञापकभावसम्बन्धः। अनुभावाः ज्ञापकाः स्थायी तु ज्ञाप्य इत्यर्थः।व्यभिचारिणां स्थायिना सह पोष्यपोषकभावसम्बन्धः। व्यभिचारी पोषकः स्थायी च पोष्यः। एवं संयोगपदस्य लोल्लटमतेन सम्बन्धत्रयमर्थः। अस्मिन् मते निष्पत्तिशब्दस्य उत्पत्तिरित्यर्थः। रसश्च अत्र रसरूपतामापन्नः स्थायी एव। स च रसः मुख्यया वृत्या अनुकार्ये रामादौ पुनः अमुख्यया वृत्या तद्रूपतानुसन्धानबलात् अनुकर्तरि नटे अपि प्रतीयते इति लोल्लटमतम्। मदमिदं मीमांसादर्शनानुसारि इत्युच्यते।

**लोल्लटमते दोषाः**

लोल्लटमते रसास्वादः अनुकार्ये रामादौ अनुकर्तरि नटे च वर्तते। परन्तु रसास्वादे मुख्यभागभाक् सहृदय एव। तस्य सहृदयस्य रसास्वादविषये न कोपि सम्बन्धो लोल्लटेन उक्त इत लोल्लटमते दोषः। पुनश्च लोल्लटेन रसः स्थायी एव इत्युक्तम्। तथा च व्यभिचारिणां स्थायिना सह पोष्यपोषकभावसम्बन्धश्च उक्तः। स्थायिनो रसस्य च अभिन्नत्वं पोष्यपोषकभावसम्बन्धः चेत्युभयं न युज्यते। यतो हि लोके रत्यादयः स्थायिनो यद्यपि क्रमेण पुष्पमाणाः अनुभूयन्ते तथापि शोकादीनां न तथानुभवः। एवञ्च स्थायिनां पोष्यपोषकभावसम्बन्धः न युज्यते इति दोषद्वयमुद्भाव्य शङ्कुकमतमवतारयति।

**शङ्कुकमतम् (अनुमितिवादः)**

शङ्कुकेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रससूत्रमेवं व्याख्यातम्।तत्र प्रथमं विभावादीनां स्वरूपं प्रतिपादयति। लोके तावत् प्रतीतयः चतुर्धा भवन्ति। राम एवायम् इति रामः

ECONSPEAK: A Journal of Advances in Management IT & Social Sciences,
Vol. 10, Issue 8, August 2020 Impact Factor 6.569 ISSN: (2231-4571)
www.skirec.org Email Id: skirec.org@gmail.com

रामरूपेण यदि ज्ञायते तदा तत्सम्यक्प्रतीतिरभवेत्। न रामोयमिति औत्तरकालिके बाधे सा प्रतीतिः मिथ्याप्रतीतिर्भवेत्। रामः स्यात् वा न वा अयं रामः इति प्रतीतिः संशयप्रतीतिर्भवेत्। रामसदृशोयमिति सादृश्यप्रतीतिश्च। लोके दृश्यमानाः कारणकार्यसहकारिरूपाः पदार्था एव नाट्ये अपि प्रदर्श्यन्ते। किन्तु नाट्ये एतेषां ज्ञानं लौकिकज्ञानात् सम्यक्मिथ्यासंशयसादृश्यरूपात् भिन्नमेव। नाट्ये तु लौकिकपदार्थाः चित्रतुरगादिन्यायेन अयं रामः इति आहार्याभेदबुद्ध्या गृह्यते।

नटाश्च कारणानि इतिहासकाव्याद्यनुसन्धानात् सहकारिकारणानि स्वानुभवबलेन च प्रदर्शयन्ति। एवं नाट्ये प्रदर्श्यमानानां कार्यकारणसहकारिकारणानां कृतृमत्वं यद्यपि अस्ति तथापि तानि सामाजिकैः अकृतृमत्वाभिमानेन स्वीक्रियन्ते। अत एव लोके विद्यमानानां नाट्ये अलौकिकत्वप्रदर्शनाय विभावानुभावव्यभिचारिशब्दव्यपदेशः।

एवं नटेन प्रदर्श्यमानानां विभावानुभावव्यभिचारिणां संयोगात् रसनिष्पत्तिरिति शङ्कुकपक्षः। अत्र संयोगपदस्य गम्यगमकभावसम्बन्धः अनुमानमित्यर्थः। नाट्ये विभावानुभावव्यभिचारिभावसंयोगात् हेतोः नटे पक्षे सामाजिकैः रसः अनुमीयते इत्यभिप्रायः। एवञ्च अयं दुष्यन्तभूमिकाग्राही नटः शकुन्तलादिविषये रतिमान् विभावानुभावव्यभिचारिभावसंयोगात् इति बोधाकारा प्रतीतिः। इयञ्च नाट्यानुमितिः लौकिकवस्त्वनुमितिविलक्षणा भवति वस्तसौन्दर्यवत्वात्। लोकवस्तूनाम् अनुमाने आह्लादकत्वं नास्ति। किन्तु काव्यवस्तुनो रसस्य अनुमाने आह्लादकत्वमस्तीत्यर्थः।

शङ्कुकपक्षे रसः एवम् अनुमित्या नटे अविद्यमानः अपि सामाजिकानां वासनया चर्व्यमाणो भवति। नाट्यात् जायमाना सामाजिकनिष्ठा इयमाह्लादप्रतीतिरेव रसप्रतीतिरित्यर्थः।

**शङ्कुकमते वैशिष्ट्यम्**

लोल्लटेन सामाजिकस्य रसस्य च कोपि सम्बन्धो नोक्तः। शङ्कुकेन तु रसस्य नटे अविद्यमानत्वं सामाजिकमनसि विद्यमानत्वञ्च स्थापितमिति लोल्लटमतादस्य वैशिष्ट्यम्। पुनश्च सामाजिकैः वासनारूपतया चर्व्यमाणो रसः इत्युक्तेः स्थायिनो रसस्य च भेदोपि शङ्कुकेन ईषत्प्रकाशितः।

**शङ्कुकमते दोषाः**

भट्टनायकस्य भुक्तिवादमवतारयितुं शङ्कुकमतस्य दोषान् प्रतिपादयत्यादौ।

रसः अनुमितिविषयतया प्रतीयमानो भवति इति शङ्कुकेनोक्तम्। प्रतीतिश्च लोके स्वगततया परगततया वा भवति। रसस्य स्वगततया प्रतीतिर्न भवति। सामाजिस्य रत्यादेः शकुन्तलादयो विभावाः न भवन्तीति कारणात्। शकुन्तलादीन् प्रति सामाजिकानां मातृवत् पूज्यत्वप्रतिपत्तिरेव स्यात् न तु कान्तात्वप्रतिपत्तिः। रत्यादीनां स्वगतत्वेन प्रतीत्यर्थं सामाजिकानां नायकादिभिः रामादिभिः सह अभेदो भवतीति यद्युच्यते तदपि न सङ्गतम्। यतो हि नायके भूमिपालत्वस्य पुराणपुरुषत्वस्य धीरत्वस्य च सम्भवात् आधुनिके सामाजिके तदसम्भवाच्च। एवं रसस्य स्वगततया प्रतीतिर्न भवति।

रसः परगततयापि न प्रतीयते। परगततया प्रतीतिश्चेत् सामाजिकानां तत्र तद्विषये ताटस्थ्यमौदासीन्यमेव वा स्यात्। सामाजिकानान्तु रसविषये न औदासीन्यप्रतीतिः। अपि तु सामाजिकाः रसास्वादे सर्वथा निमग्ना एव। एवं रसस्य परगततयापि प्रतीतिर्न सम्भवति। लोल्लटपक्षे रसोत्पत्तिः अभिनवगुप्तपक्षे अभिव्यक्तिश्च स्थापितम्। तन्मतद्वयमपि निराकृत्य भट्टनायकः स्वस्य भुक्तिवादं प्रस्तौति।

**भट्टनायकमतम् (भुक्तिवादः)**

काव्ये नाट्ये च त्रयो व्यापाराः वर्तन्ते अभिधा, भावकत्वं, भोजकत्वञ्चेति। तत्र अभिधाव्यापारेण विभावादयः अभिधीयमानाः भवन्ति। तच्च काव्ये दोषरहितैः गुणालङ्कारसंस्कृतैः शब्दैः नाट्ये चतुर्विधैः अभिनयैश्च सम्भवति। तदनन्तरं द्वितीयस्य भावकत्वव्यापारस्य प्रवर्तनेन विभावादीनां कालदेशव्यक्त्यादिपरिच्छदपरिहारेण साधारणीकृतस्वभावं लभन्ते। तेन च कारणेन अस्य साधारणीकरणव्यापारः इत्यपि नामास्ति। एवं साधारणीकृतानां विभावानुभावव्यभिचारिणं संयोगात् स्थायी रसरूपतया प्रतीयते।

अथ साधारणीकृतो रसः तृतीयेन भोजकत्वव्यापारेण भुज्यते इति भट्टनायकः। भोजकत्वव्यापारेण यदा भुज्यते तदा अन्तःकरणं रजस्तमसामनुवेधेन सत्वोद्रेकजनितानन्देन युक्तं भवति। एवं भोजकत्वव्यापारेण अन्तःकरणम् आनन्दमयं जायते। तेन सह रसो भुज्यते अनुभूयते।

**अभिनवगुप्तमतम्**

भट्टनायकमते भावकत्वव्यापारेण विभावादिनां साधारणीकरणं ततो भोजकत्वव्यापारेण रसस्य भुक्तिश्चेति उक्तम्। अभिनवगुप्तः प्रायेण रसविषये भट्टनायकमतमेव ईषद्वैशिष्ट्येन अनुसरति। रसास्वादप्रक्रियायां भावकत्वं भोजकत्वमिति व्यापारद्वयकल्पनं नावश्यकम्। एकेनैव व्यापारेणास्य कृतार्थत्वात्। स च व्यापारो व्यञ्जना एवेति भट्टनायकमतात् अभिनवगुप्तमतस्य वैशिष्ट्यम्।

अभिनवगुप्तः भरतोक्तं रससूत्रं स्वाभिमतं अभिव्यक्तिवादमनुसृत्य एवं विवृणोति। साधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानो रसः भोजकत्वव्यापारेण भुज्यतेति भट्टनायकेनोक्तम्। तत्र भावकत्वव्यापारातिरिक्तो भोजकत्वव्यापारो नावश्यक इति अभिनवगुप्तमतम्। यतो हि रसस्य सिद्धस्वभावत्वं नास्ति येन तस्य भुक्तिः स्यात्। तस्मात् भट्टनायकमतम् अपूर्णमिति कृत्वा अभिनवगुप्ताचार्येण स्वाभिमतं रसव्याख्यानमवतार्यते।

लोके ललनादिभिरालम्बनकारणैः उद्यानादिभिरुद्दीपनकारणैः कटाक्षभुजाक्षेपादिभिः कार्यैः शङ्कादिभिः सहकारिकारणैश्च रत्यादीनां स्थायिनाम् अनुमाने अभ्यासपाटववतां सहृदयानां काव्ये नाट्ये च तैरेव कारणादिभिः शृङ्गारादीनां रसानामनुभवः। लौकिकाः कारणकार्यादयः काव्ये नाट्ये च कारणत्वादिस्वस्वभावपरिहारेण विभावादिव्यापारेण अलौकिकविभावादिशब्दव्यपदेश्याः भवन्ति। तेनैव तेषां साधारणीकरणप्रतीतिरपि सम्भवति। मम एव वा न ममैव वा शत्रोरेव वा न शत्रोरेव वा तटस्थस्यैव वा न तटस्थस्यैव वा इति सम्बन्धविशेषस्वीकारपरिहारात् विभावादयः साधारणीकृताः भवन्ति। एवं साधारण्येन प्रतीतैः विभावादिभिः सामाजिकानां मनसि वासनात्मकतया स्थितः स्थायी रसरूपेण अभिव्यज्यते। .

साधारण्यबलात् विभावादीनामिव सामाजिकानामपि तत्कालविगलितपरिमितप्रमादृत्वभावावेशः सम्भवति। तेन च वैद्यान्तरसम्पर्कशून्य-अपरिमितप्रमातृभावं सामाजिकाः अनुभवन्ति। तदा प्रमाता सकलसहृदयसंवादभाक् अपि भवति। एवंभूतेन प्रमात्रा साधारण्येन स्वाकार इव अभिन्नत्वेन गोचरीकृतचर्व्यमाणतैकप्राणो भवति रसः। स च विभावादिजीविताविधि एव परिस्फुरति। रसचर्वणा तु विभावादीनां विनाशे अपि सम्भवति। एवं चर्व्यमाणो रसः उरः इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिव आलिङ्गन् अन्यत्सर्वमिव तिरोदधत् ब्रह्मास्वादमिव अनुभावयन् अलौकिकचमत्कारं जनयति।

एवंभूतस्य रसस्य सर्वथा सर्वदा च अलौकिकत्वमस्तीति स्थापयति अभिनवगुप्ताचार्यः। स रसो न कार्यः। विभावादिविनाशेपि चर्वणारूपस्य तस्य सम्भवप्रसङ्गात्। नायं रसः ज्ञाप्यः सिद्धस्य तस्य असम्भवात्। किन्तु रसोयं विभावादिभिः रञ्जितः चर्वणीयश्च। कारकज्ञापकाभ्यां अन्यत् क्व दृष्टमिति चेत् न क्वचित् दृष्टमिति रसस्य अलौकिकत्वसिद्धेः भूषणमेतत् न तु दूषणम्।

**उपसंहारः**

चतुर्ष्वेतेषु रससूत्रव्याख्यानेषु अभिनवगुप्ताचार्याणां अभिव्यक्तिवादः भूरिजनाभिनन्दितो दृश्यते। रसास्वादो न निर्विकल्पकः, विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकः चर्व्यमामस्य अलौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य उभयात्मकत्वमपि सम्भवतीति सर्वथा रसास्वादस्य अलौकिकत्वमेव सूचयतीति अभिनवगुप्ताचार्यमतम्। चत्वार्यपीमानि रससूत्रव्याख्यानानि रससूत्रचर्चायां पथप्रदर्शकान्यासन्नित्यत्र नास्ति सन्देहः।

**परिशीलितग्रन्थसूची**


- मम्मटः, (सम्पादकः श्री हरिशङ्करशर्मा), चौखम्बा संस्कृतसंस्थानम्, वाराणसी, 2000
- आनन्दवर्धनः,(व्याख्याकारः सम्पादकश्च शिवप्रसाद द्विवेदी) ध्वन्यालोकः अभिनवगुप्तपादविरचित लोचनसहितः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी 2020
- भरतमुनिः, सम्पादकः बाबुलाल् शुक्ल शास्त्री, नाट्यशास्त्रम्, चौखम्बा संस्कृतसंस्थानम्, 2015